कुदिनानि हारः। तज्जं फलं स्युर्विकला गुणस्तु लिप्ताग्रमस्माच्च कला लवाग्रम्। एवं तदूर्द्ध्वं च तथाधिमासावमाग्रकाभ्यां दिवसा रवीन्द्वोः"। "ग्रहस्य विकलावशेषाद्ग्रहाहर्गणयोरानयनम्। तद्यथा। षष्टिर्भाज्यः। कुदिनानि हारः। विकलावशेषं शुद्धिरिति प्रकल्प्य साध्ये गुणाप्ती। तत्र लब्धिर्विकलाः स्युर्गुणस्तु कलावशेषम्। एवं कलावशेषं शुद्धिः षष्टिर्भाज्यः कुदिनानि हारः। फलं कलाः। गुणोंऽशशेषम्। एवमंशशेषं शुद्धिस्त्रिंशद्भाज्यः कुदिनानि हारः। फलं भागाः। गुणो राशिशेषम्। एवं राशिशेषं शुद्धिर्द्वादश भाज्यः। कुदिनानि हारः। फलं गतराशयोगुणोभगणशेषम्। एवं कल्पभगणा भाज्यः। कुदिनानि हारः। भगणशेषं शुद्धिः। फलं गतभगणाः। गुणोऽहर्गणः स्यादिति। अस्योदाहरणानि त्रिप्रश्नाध्याये। एवं कल्पाधिमासा भाज्योरविदिनानि हारोऽधिमासशेषं शुद्धिः। फलं गताधिमासाः। गुणो गतरविदिवसाः। एवं युगावमानि भाज्यश्चन्द्रदिवसा हारोऽवमशेषं शुद्धिः। फलं गतावमानि। गुणोगतचन्द्रदिवसाइति" प्रमि०।

अहर्गणानयने अधिमासावमपरित्यागे कारणमाह" सि० शि०"अहर्गणस्यानयनेऽर्कमासाश्चैत्रादिचान्द्रैर्गणकान्विताः किम्। कुतोऽधिमासावमशेषके च त्यक्ते यतः सावयवोऽनुपातः। दर्शावधिश्चान्द्रमसो हि मासः सौरस्तु संक्रान्त्यवधिर्यतोऽतः। दर्शाग्रतः संक्रममानतः प्राक् सदैव तिष्ठत्यधिमासशेषम्। दर्शान्ततो यात्ततिथिप्रमाणैः सौरैस्तु सौरा दिवसाः समेताः। यतोऽधिशेषोत्थदिनाधिकास्ते त्यक्तं तदस्मादधिमासशेषम्। तिथ्यन्तसूर्य्योदययोस्तु मध्ये सदैव तिष्ठत्यवमावशेषम्। त्यक्तेन तेनोदयकालिकः स्यात् तिथ्यन्तकाले द्युगणोऽनुपातः"। "मध्यममानेन यावत्यमावास्या तदन्ते चान्द्रामासान्तः। मध्यमार्कस्य यस्मिन् दिने संक्रान्तिस्तत्र संक्रान्तिकाले रविमासान्तः। तयोः रविचन्द्रमासान्तयोरन्तरे यावत्यस्तिथयः सावयवास्ता अधिमासशेषतिथयः। यतः सौरचान्द्रान्तरमधिमासाः। अहर्गणानयने गताब्दा रविगुणास्ते सौरा मासा जाताः। अतस्तेषु चैत्रादिचान्द्रतुल्याः सौरा एव मासा योजितास्ते संक्रान्त्यवधयो जातास्तेषु त्रिंशद्गुणेषु गततिथितुल्याः सौरा एव दिवसा योजिताः। अतः सौरचान्द्रान्तरेणाधिका जातास्तदन्तरमधिमासशेषदिनानि भवन्ति सौरचान्द्रान्तरत्वात्। अतोऽधिमासशेषदिनान्तेभ्यः शोध्याः। अथ चाधिमासानयनेऽनुपातलब्धैरधिमासैर्दिनीकृतैस्तच्छेषदिनैश्च युक्ताः सौराहाश्चान्द्राहा भवितुमर्हन्ति। एवमत्राधिमासशेषदिनानि क्षेप्याणि। तत्र शोध्यानि। अतः कारणादधिमासशेषं त्यक्तम्। अथावमशेषत्यागकारणमुच्यते। तिथ्यन्तानन्तरं यावतीभिर्घटीभिः सूर्य्योदया अवमशेषघटिकाः यतश्चान्द्रसावनान्तरमवमानि। यद्यवमशेषं न त्यज्यते लब्धावमैरवमशेषघटिकाभिश्च तिथय ऊनीक्रियन्ते तदा तिथ्यन्ते सावनोऽहर्गणो भवति। अथ च सूर्य्योदयोऽवधिः साध्यः। तिथ्यन्ताहर्गणोऽवमशेषघटीभिर्युक्तः सन्नुदयावधिर्भवति। अतोऽवमशेषे त्यक्ते स्वतः सूर्य्योदयावधिर्भवति" प्रमि०। "अहर्गणोमध्यमसावनेन कृतश्चलत्वात् स्फुटसावनस्य। तदूनखेटा उदयान्तराच्च कर्म्मोद्भवेनोनयुताः फलेन" सि० शि० अहर्गणे विशेषमाह सि० शि०। "अभीष्टवारार्थमहर्गणश्चेत् सैको निरेकस्तिथयोऽपि तद्वत्। तदाधिमासावमशेषके च कल्पाधिमासावमयुक्तहीने"। "इह किल स्थूलतिथ्यानयने यस्यां तिथौ यो वार आगतः स चेदहर्गणे नागच्छति तदाहर्गणं सैकं निरेकं कृत्वा ग्रहाः साध्या इति ज्योतिर्विदां संप्रदायो युक्तियुक्त एव। यतोऽहर्गणस्य वारो नियामकः। एवं कृते यो विशेषः सोऽभिधीयते। तिथयोऽपि तद्वदित्यादि। अत्रैतदुक्तं भवति। यदा वारार्थं सैकोऽहर्गणः कृतस्तदाधिमासावमशेषाभ्यां चन्द्रार्कानयने कोष्ठाहतैरङ्ककृतेन्दुविश्वैरित्यादौ द्वादशगुणास्तिथयोऽर्कभागेषु याः क्षेप्यास्ताः सैकाः कृत्वा द्वादशगुणाः क्षेप्याः। यदा निरेकोऽहर्गणः कृतस्तदा निरेकम्। तथा यदि सैकोऽहर्गणस्तदाधिमासशेषं कल्पाधिमासैर्युतं कार्य्यम्। अवमैरवमशेषं च। यतः सैकासु तिथिषु सैकोऽहर्गणो निरेकासु निरेकः। तथा प्रतिदिनमधिमासशेषस्याधिमासैरुपचयोऽवमैरवमशेषः स्यात् युक्तमुक्तम्" इति प्रमिता०।

अहर्जर पु० अहोभिःपरिवर्त्तमानो लोकान् जरयति जॄ—णिच्—अच्, अहानि वाऽस्मिन् जीर्य्यन्ति आधारे अप् वा। "संवत्सरे "यथापः प्रवता यन्ति यथा मासा अहर्ज्जरम्" ह०उ०।

अहर्दिव न० अहश्च दिवा च समा० द्व० तुल्यार्थकतया वीप्सा गम्यते। १प्रतिदिने इत्यर्थे "य इत्यमस्यास्यग्रमहर्दिवं